International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 14-17
© 2020 IJSR
www.anantaajournal.com
Received: 10-11-2019
Accepted: 16-12-2019

**डॉ. सोमनाथदाश:**
सहायकाचार्य, अनुसन्धान प्रकाशन विभाग, राष्ट्रीय संस्कृत विद्यापीठम्, तिरुपति, आंध्र प्रदेश, भारत।

Corresponding Author:
डॉ. सोमनाथदाश:
सहायकाचार्य, अनुसन्धान प्रकाशन विभाग, राष्ट्रीय संस्कृत विद्यापीठम्, तिरुपति, आंध्र प्रदेश, भारत।

# श्रीनिधिसाहित्ये उक्तिप्रत्युक्तिविचार:

**डॉ. सोमनाथदाश:**

**सारांशः**
दक्षिणभारते प्रसिद्धेषु भक्तिसाहित्यप्रणेतृषु वरकविः कविवरश्च श्रीश्रीनिधिस्वामी अन्यतमः । तेन बहूनां देव-देवीनां महत्त्वमुररीकृत्य स्वीयभगवद्भक्तिः प्रादर्शि । प्रायशः विंशतिसहस्रश्लोका: तेन रचिता: । एतेषु सर्वेष्वपि सौन्दर्यतत्त्वानि विलसन्ति सर्वेषां सहृदयानां हृदयानि रञ्जयन्ति । रस-गुण-अलङ्कार-रीति-वक्रोक्ति-औचित्यसारभूतानि अस्य पद्यानि सर्वेषां पण्डितानामपि चेतांसि चन्दन्ति । कविः कश्चन शब्दक्रीडानिपुणः शब्दाडम्बरमेव स्वकाव्ये प्रदर्शयति, कश्चन भावप्रवणः भावेषु तल्लीनः स्वतःस्फूर्ततया शब्दाडम्बरं विना प्रसादगुणगुम्फितानि पद्यानि रचयति, अन्यश्च प्रतिभावान् भावं शब्दाडम्बरं च उभयथा उट्टङ्कयितुं प्रभवति । एवं प्रकारेण एतेषु तृतीयप्रकारकोऽयं श्रीनिधिस्वामी भावभङ्गं विना शब्दसंयोजनायामपि निपुणः दृश्यते । एकस्मिन्नेव श्लोके उक्तिप्रत्युक्तिं प्रदर्श्य स्वीयशब्दसंरचनायाः अपूर्वं वैदुष्यं तेन प्रदर्श्यते । एषा उक्ति-प्रत्युक्तिप्रक्रिया "संवाद:", "वाकोवाक्" इत्यपि उच्यते । आंग्लभाषायामेतत्पदं Dialogue इति कथ्यते । वेदोपनिषद्रामायण-महाभारत-पुराण-संहितादिषु ग्रन्थेषु एतादृशाः संवादाः प्रायशः प्राप्यन्ते । श्रीमद्भगवद्गीतायां श्रीकृष्णार्जुनसंवादः प्रसिद्धः । एतादृशाः संवादाः पृथक् पृथक् श्लोकेषु प्राप्यन्ते । श्रीनिधिस्वामिनामुक्तिवैचित्र्यं तु तस्माद्भिन्नं भवति । एकस्मिन्नेव च्छन्दोबद्धपद्ये द्वयोः संवादः उक्तिप्रत्युक्तिश्च तेन प्रदर्श्यते । एतादृशी परम्परा अलङ्कारशास्त्रे शब्दालङ्कारसन्दर्भे वक्रोक्त्यलङ्कारे सहृदयैराकलयितुं शक्यते । प्रकृते शोधपत्रे श्रीनिधिसाहित्येषु - वसुमतिशतकम्, विण्णगरप्पन्विंशति:, श्रीगोपालत्रिंशत्, श्रीभद्राचलपञ्चाशत्, श्रीद्वारकात्रिंशत्, मुरली- पञ्चाशत्, पादस्तुतिः, कुञ्जररञ्जनम्, मञ्जुरामायणे सीताविवाहाध्याय:, श्रीमालोलविलास: (प्रथमसर्ग:), श्रीमन्दस्मितरामायणम् (बालस्पन्द:) इत्यादिषु वाकोवाग्वैचित्र्यम् किञ्चिदत्रोदाहरणपुरस्सरं पर्यालोच्यते ।

**मूल शब्दा:** विंशतिसहस्रश्लोका, सर्वेषां सहृदयानां हृदयानि, किञ्चिदत्रोदाहरणपुरस्सरं पर्यालोच्यते

## प्रस्तावना

कटुकषायाम्लमधुरलवणरसपाकनिपुण: स्रष्टा परंब्रह्म विधिबद्ध: सन् जरामरणजर्जरितस्य भौतिकजगत: सृष्टिं विदधाति; परन्तु तद्भिन्न: सहृदयपदारूढ: नियतिकृतनियममुक्त: सहृदयहृदयविजेता अलौकिककृतिस्रष्टा नवरसपाकचतुर: कवि: कामपि अपूर्वां भारतीं सृजति, यया स: कीर्त्ति-प्रीतिभ्यां सह धर्मार्थकाममोक्षान् पुरुषार्थानपि अवाप्नोति । स: स्वीयभारतीराज्या सह धराजगत्या: भावसाम्रज्यस्य स्वतन्त्रसम्राड्रूपेण अजातशत्रु: स्वेच्छया स्वसंसारं सृजति । अत: साधूक्तं –

अपारे काव्यसंसारे कविरेव प्रजापति: ।
यथाऽस्मै रोचते विश्वं तथेदं परिवर्तते ॥ (ध्वन्यालोकः – 3/पृ.551)

सामान्यतया यान् शब्दान् वयं कथयाम:, यांश्चार्थान् वयमुल्लिखाम: तानेव विशिष्टतया रसगुणालङ्कार-रीति-वक्रोक्ति-पाक-शय्यादिभि: स्वलेखनीमाध्यमेन सज्जीकृत्य उपस्थापयति कवि: । तदुक्तं –

यानेव शब्दान् वयमालपाम: यानेव चार्थान् वयमुल्लिखाम: ।
तानेव विन्यासविशेषभव्यैस्संलापयन्तो कवयो जयन्ति ॥ इति । (शिवलीलार्णवः – 1/13)

कवि: ऋषि:, प्रजापति:, सम्राड्, सामाजिक:, सहृदय:, चित्रकर:, मधुपायी, रसिको भवति । तस्य पुण्यपरम्पाराया: आदिदायादा: मन्त्रद्रष्टार: वैदिकार्षचिन्तनपरम्पराया: ऋषय एव भवन्ति । किमर्थमिति चेत् लौकिककाव्यचिन्तनस्य आदिस्रोतांसि वेदा एव भवन्ति । एकत्र भरतमुनि: कथयति -

जग्राह पाठम् ऋग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥ (नाट्यशास्त्रे, प्रथमाध्याये)

अस्मिन् क्रमे दृश्य-श्रव्यात्मकानि नैकानि काव्यानि विरचितानि। प्रत्येकं काव्येषु नायक-नायिकाद्यालम्बनविभावा: रसमालम्ब्य तिष्ठन्ति । दृश्यादिकाव्येषु यानि पात्राणि भवन्ति, तेषां पारस्परिकसम्भाषणं कविना उपस्थाप्यते तथा च प्रत्यक्षतया तेषामाङ्गिक-वाचिक-आहार्य-सात्त्विकाभिनय: अस्माभि: द्रष्टुं शक्यते । परन्तु महाकाव्य-खण्डकाव्यादिषु तथा वस्तुस्थिति: न भवति । अत: तेषां केवलं श्रवणेन्द्रियग्राह्यत्वात् श्रव्यकाव्यनाम्ना तानि व्यपदिश्यन्ते।

**श्रव्यकाव्येषु उक्तिप्रत्युक्तिविचार:**

केचन कवय: श्रव्यकाव्येष्वपि सम्भाषणप्रक्रियाया: उपस्थापनं छन्दोबद्धपद्यै: अनुस्यूततया कुर्वन्तो दृश्यन्ते । तत्र एकस्मिन्नेव पद्ये उक्ति-प्रत्युक्तय: सहृदयै: आकलयितुं शक्यन्ते। एषा उक्ति-प्रत्युक्तिक्रिया "संवाद:", "वाकोवाक्" इत्यपि उच्यते। आंग्लभाषायामेतत्पदं Dialogue इति कथ्यते। अस्यार्थ: –

"Dialogue (sometimes spelled dialog in American English) is a literary and theatrical form consisting of a written or spoken conversational exchange between two or more ("dia" means through or across) people."

संवादरचनापरम्परा वैदिककालादेव प्रलचति। यथा –
अगस्त्यलोपामुद्रासंवाद**:** [1.179\5 trishtubhs, 1 brhati]
विश्वामित्रनदीसंवाद**:** [3.33\12 trishtubhs, 1 anushtubh]
यमयमीसंवाद**:** [10.10\12 anushtubhs]
अग्निदेवतासंवाद**:** [10.51\ 9 trishtubhs]
वृषाकपि-तत्पत्निसंवाद**:** [10.86]
पुरुरवोर्वशीसंवाद**:** [10.95:\18 trishtubhs]
याज्ञिक-तत्पत्नीसंवाद: [10.183:\3 trishtubhs]

एवं प्रकारेण ये संवादा: वैदिकर्षिभि: प्रणीता: तत्परिपन्थिन: कवयोऽपि स्वकाव्ये तत्समसंवादान् परवर्तिकालेऽपि निवेशितवन्त: । अलङ्कारशास्त्रे प्रतिपादितेष्वलङ्कारेष्वन्यतमे वक्रोक्त्यलङ्कारेऽपि वाकोवाग्विन्यासस्यैव वैशिष्ट्यं वर्तते। यथोच्यते तल्लक्षणं –

अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि।
अन्य: श्लेषेण काक्वा वा सा वक्रोक्तिस्तथा द्विधा॥ (सा.द. -१०/९)

अत्र वक्तृश्रोत्रो: उक्तिप्रत्युक्ति: प्रचलति। वक्ता यद्वदति श्रोता तं भिन्नार्थेन अवबुद्ध्य अपरं किमपि निगदति। उदाहरणं पश्याम: –

"के यूयं ?" "स्थल एव सम्प्रति वयम्" "प्रश्नो विशेषाश्रय:"
"किं वृते विहग: स वा फणिपतिर्यत्रास्ते सुप्तो हरि: ?"।
"वामा यूयमहो विडम्बरसिका: कीदृक्स्मरो वर्तते
येनास्मासु विवेकशून्यमनस: पुंस्येव योषिद्भ्रम: ।।" (साहित्यदर्पणे – 10 परिच्छेदे)

अत्र द्वयो: सम्भाषणं यथा प्रचलति तथैव आशुकविसार्वभौमानां वैष्णवभक्तश्रेष्ठानां श्रीमतां श्रीनिधिस्वामिनां रचितेषु विंशतिसहस्राधिकश्लोकमालासु काऽपि उक्तिप्रत्युक्तिविचारधाराऽपि विलसति । तदालोचनात् प्राक् कविप्रवराणां विषये किञ्चिदत्रोपस्थाप्यते।

**श्रीनिधिस्वामिनां सामान्यपरिचय:**

भारतीयसंस्कृतभारत्या: सुप्रसिद्धचिन्तानायका: सहृदयहृदयनायका: भारतवर्षस्य विविधदेवालयेषु पूजितानां देवदेवीनां वन्दनपुरस्सरं नैकानि स्तोत्राणि विरचितवन्त:। येषामध्ययनेन कविप्रवराणां भगवद्भक्ति: अनवरुद्धतया अस्माभि: आकलयितुं शक्यते। यत्र भगवद्भक्ति: तत्र भक्तिरस:, अथवा भावध्वनिर्भवति। तस्मात् तेषां कृते "भक्तकवि:" "भावकवि:" इति बिरुदया सम्बोधयामश्चेन्नात्युक्तिर्भविष्यति। एकत्र तेषां पुत्रा: तं "वरकवि:" "कविवर:" इति द्विधा संवोधनं कृत्वा तेषां पाण्डित्यं सहृदयतां च उभयथा प्रकाशयामासु: । ते न केवलं देवदेवीस्तोत्राणि, अपि तु नाटकानि, नगनदीवर्णनानि, शास्त्रार्थविचारान्, शृङ्गारपोषकखण्डकाव्यानि, महाकाव्यानि अपि प्रणिनाय। कविवरैरेतै: प्रायश: विंशतिसहस्रश्लोका: लिखिता:। ते सर्वेऽपि श्लोका: प्रायश: ग्रन्थलिप्यामेव आसन्। महता श्रमेण तेषां पुत्रा: तान् देवनागरीलिप्यां, तामिललिप्यां च परिवर्तनं कृत्वा अनेकत्र प्रकाशितवन्त: । तिरुपतिराष्ट्रियसंस्कृविश्वविद्यालयपक्षत: अपि तेषां संग्रहरूपेण एक: बृहद्ग्रन्थ: प्रकाशित:। तत्कृतिसौरभाघ्राणेन यथाबुद्धि श्रीनिधीनां श्रीनिधौ "उक्तिप्रत्युक्तिप्रक्रिया" इत्यमुं विषयमुररीकृत्य सामान्यतया किञ्चिदत्रोपस्थाप्यते।

**श्रीनिधिसाहित्ये उक्ति-प्रत्युक्तिविचार:**

वसुमतिशतकम्, विण्णगरप्पन्विंशति:, श्रीगोपालत्रिंशत्, श्रीभद्राचलपञ्चाशत्, श्रीद्वारकात्रिंशत्, मुरलीपञ्चाशत्, पादस्तुति:, कुञ्जररञ्जनम्, मञ्जुरामायणे सीताविवाहाध्याय:, श्रीमालोलविलास: (प्रथमसर्ग:), श्रीमन्दस्मितरामायणम् (बालस्पन्द:) इत्यादिषु कृतिषु वाकोवाग्वैचित्र्यम् अतीव रमणीयतया भक्तकविभि: श्रीमद्भि: श्रीनिधिभि: उपस्थापितम्। केषाञ्चनोदाहरणानि अत्रोपस्थाप्यन्ते। यथा –

**वसुमतिशतके** –

"भोक्तुं त्वामहमुत्सुकस्तदुचितं" "साकूतमेतत्कथम्?"
"भक्तं निर्लवणं किलात्र भगवन्! मा भुंक्ष्व भक्तामिमाम्।"
"यस्मान्मे लवणोदधिर्वसनतामालम्बते; किन्विदम्?"
"तच्चात्रापनयाम्ययीति" युवयोर्हासोम: पातु न: ॥ ६१ ॥

**यथा वा** –

"मार्कण्डेयसुते! मनो हरसि मे मन्मानसार्दुत:
चन्द्रोऽयं विजितो भवन्मुखसरोजातेन नित्यं यत: ।"
"स्वामिन्! यादव! मन्मथो मनसिजस्सर्वाङ्गशोभान्वित:
नासीत् किं भवता ततो हरसि मां नाथेति" रम्या रति: ॥ ६२ ॥

**यथा वा** –

"वसुमति!" "सुमते! किं?" "धाम्न्यसि स्वर्णवर्ण:"
"भवसि तदिव च त्वं नाम्न्यपि न्यूनवर्ण: ।"
"न खलु न खलु नाम्नि स्वर्णवर्णोऽपि धाम्नि
श्रुतिगणगुणितोऽस्मी"त्यम्ब! पातु स्मितं ते॥ ६३ ॥
"कान्ते! कोपवतीव भासि किमिदं को वाऽपराध: कृत:"
"किन्नामाम्बरहारिणे"ति हरिणा: नो भाषसे वा मया।
व्यक्तं चिन्तय सन्त्यजाथ च रुषं या त्वं मया स्थापिता
नित्यं ह्यम्बरपत्तने मदवनी"त्येवं प्रिये शंसति॥ ६७॥

**"विण्णगरप्पन्"विंशतौ** –

"हे नाथ! किं महि?" "सदा तुलसीवनेऽस्मिन्
वासं कुरु", "श्वसुरसद्मनि नोचितस्स: ।"
"कस्मात्?" "जना मम मनोव्रणकारिवाक्यं
ब्रूयु:" "न भी:, लवणवर्जितभोजनेन" ॥ ७ ॥

**श्रीगोपालत्रिंशत्स्तोत्रे** –

"क्षेत्रं चम्पककाननं कथमिदं?" "यच्चम्पकानोकहा:
भूयांसस्स्युरहो" "तदेव न परे वृक्षास्तु भूयास्थिता:"।
"तस्मादेवमहं करोमि हृदये देवस्सहस्राकृति:
श्रीमच्चम्पकनासिकस्तव वने मातर्हरिद्रे! तत:" ॥ २४॥

**श्रीभद्राचलपञ्चाशत्स्तोत्रे** –

"आग: किं रचितं त्वया रघुपतौ गोदावरीदं वद
स्वामिन्यम्ब!" "शृणुष्व वत्स! तदिदं सीता च नीता यदा।
दृष्ट्वा वेति तदा वदेति रघुराट् माऽपृच्छदंहो! मया
दृष्टा सेति न दत्तमुत्तरमित: को वाऽपराधो महान्" ॥ ७ ॥

**यथा वा** –

"केनैवं रचितं त्वया ?" "ननु भिया नक्तञ्चराधीश्वरात्
गृध्रो हन्त ! भयं विहाय निपुणः कृत्वा रणं रक्षसा ।
लब्ध्वा दुर्लभमुच्चकैः पदमहो ! क्रीडां स धत्तेऽधुना
तद्वद्वा नरको (के ? का ?)ऽपि साहमभवं संवञ्चिता स्वात्मना" ॥ ८ ॥

**पुनरपि** –

"मध्ये ते मुनिराण्मुखास्समभवन् त्वन्नीरक्लृप्ताप्लवाः"
"मन्मध्ये क इवास्ति" "साहमधुना मन्नीरक्लृताप्लवम् ।
द्रक्ष्यन्त्येष" दयानिधी रघुपतिस्सीतासमेतस्सुखं
भद्रागस्य शिरोविहाररसिकश्चिन्तामिमां तत्त्यज ॥ १० ॥

**यथा पुनः -**

"मातः !" "वातज !" "केन नाऽत्रभवती रामाय रक्षोहतां
सीतां नाऽकथयत् ?" "भयङ्करमुखाद्भीताऽस्मि(हि) तस्मादहम्" ।
"का भीतिस्तव? कार्तवीर्यवनिताश्श्री(ता) नर्मदाजीवने
क्रीडावस्तु विधाय तद्वहुमुखं नर्म ह्यकुर्वन् वरम्" ॥ २५ ॥

**श्रीद्वारकयत्रिंशत्स्तोत्रे** –

"मातस्सरस्वति !" "कवे !" "कवयामि" "कस्मै ?"
"कस्मै स्थिताऽऽशुकवितैव" "यथोक्तवादात् ।"
"सिद्धं समीहितमिहाशुकवित्वलाभात्
सत्यं कवेऽतिनिपुणः कवयातिहृद्यम्" ॥ २ ॥

**यथा वा** –

"स्वामिन् ! श्रीद्वारकायाः !" "किमिति वद को !" "मन्मनोन्तर्निमग्नः
भूयास्त्वं" "योगिचित्तं तव किमु तदिदं ?" "किञ्चिदेतज्जडं मे" ।
"तस्माद्दूरे नितान्तं" "कथमिव घटते तन्न यत्ते स्वभावः"
त्वत्पुर्या अप्यमुष्याः जयति यदुपते ! यज्जडान्तर्निवासः" ॥ ३ ॥

**मुरलीपञ्चाशत्काव्ये** –

"स्वामिन् ! नारद !" "वंशहस्त ! किमिदं !" "स्वामिन्नुपेन्द्रोऽस्म्यहं
रेखाकर्मकृते मया खलु लघुर्दण्डः परं धार्यते ।"
"मैवं वाचय मां" "न ते क्व महती" "भग्ना हि सा" "केन वा ?"
"वंशेनैव तवे"त्युपेन्द्रविधिभूमुन्योरभूतां गिरौ" ॥ १७ ॥

**पादस्तुतौ -**

"हे गङ्गाधर ! देव ! किं वद विभो !" "वैरोचने ! त्वं परः
मत्तो मान्य इति स्थितिः" "कथमिदं ?" तच्छ्रूयतां वच्म्यहम् ।
गङ्गा यत्र विभाति कुत्रचिदहो विष्णोः पदे तद्भवान्
धत्ते नित्यमिति प्रशंसितमभूद्विष्णोः पदं शम्भुना ॥ २३ ॥

**कुञ्जररञ्जने -**

"मातङ्गानन ! मातुलस्य महतो मय्येव सक्तं मनः"
"कस्मात्" "तत्सुषमां बिभर्मि वपुषा कामाधिकां यत्ततः" ।
मैवं, भक्तपरस्य तस्य तु मनो मातङ्गसंरक्षिणः
मय्येवेति कुमारकुञ्जरमुखस्पर्धा मिथो जृम्भते ॥ २७ ॥

**मञ्जुरामायणे सीताविवाहाध्याये** –

"मातर्भारति !" "किं कवे ?" "कवयितुं श्लोकान् प्रवृत्तोऽस्म्यहं
किं पापाय ? किमन्धसे ? किमपरं काचाय नीचाय वा ?" ।
"मा मातर्विषयोऽधुना हि भगवान् श्रीजानकीनायकः"
"श्लाघ्या नाम मतिस्तवापि तदहं तुष्टास्मि कामं लिखेः" ॥ ३ ॥

**श्रीमालोलविलासे प्रथमसर्गे** –

"याचे श्रीनरसिंह !" "किं कविमणे" "लक्ष्मीं च वराणीं सतीं"
"लक्ष्मीरङ्कगतास्ति साऽत्र न परा तद्याहि वाणीपतिम्" ।
"लक्ष्मीरकगता यतस्तव ततः पद्मासनत्वं स्फुटं
हंसैः त्वं परमैर्धृतो विजयसे, वाणीपतिः कः परः ?" ॥ ६ ॥

**श्रीमन्दस्मितरामायणम् (बालस्पन्दः)**

"विष्णो ! पङ्क्तिरथस्य पार्थिवमणेः पुत्रत्वमेत्यावनौ
कुर्याः पङ्क्तिमुखस्य राक्षसपतेः दुष्टात्मनस्संहतिम्" ।
दान्तीं पङ्क्तिमहो प्रदर्श्य विबुधैरित्यर्थितः सादरं
त्वं तां पङ्क्तिमदर्शयन्यदकरोः मन्दस्मितं पातु तत् ॥ ४ ॥
"मा मा भीतिर्भवतु भवतां भद्र"मित्युक्तिरम्यं
मायापेतं सदसि मरुतां यत् स्मितं मन्दमासीत् ।
मुग्धं तत्किं वसति च मुखावासने स्वानने ते
स्निग्धं मह्यं दिशतु तदिदं भद्रपूर्णामभीतिम् ॥ ५ ॥
"साहाय्यं तव संविधातुमवनौ सृष्टो मया जाम्बवान्"
"स्नेहस्ते परमः पितामह ! मयि" "त्वं मत्पिता किं न्विदम् ?" ।
"किन्नाजो मम हे ! पितामह इह श्रीमन्निति" व्याहृतौ
धातुस्ते च यदाऽऽस मन्दहसितं तत्तेऽद्य विद्योतते ॥ ६ ॥
"दत्तः किं मम रङ्गिणा करुणया सत्यं सुतस्तत्समः
किं वाऽथ स्वयमेव येन सुषमा काचिन्मुखे तावके ।
नेत्रं कोमलपद्मपत्रविपुलं वत्से"ति मातुर्गिरा
यन्मन्दस्मितमास्यभूषणमभूत् तत्तेऽद्य विद्योतते ॥ ७ ॥
"निद्रामेति न लालितोऽपि मधुरैः गीतैस्सुमित्रे ! शिशुः
बालेऽस्मिन् तव लक्ष्मणे तु निहिते द्रागेति निद्रा"मिति ।
मातुस्ते गदितं निशम्-य रचितं मन्दस्मितं यत्त्वया
तत् किं दर्शयसि स्वयं मम पुरः श्रीमातृवंश्यस्य भोः ! ॥ ८ ॥

एवं केषुचित् श्लोकेषु कविदेवयोः केषुचित्कविकवितामुखेन विष्णुलक्ष्म्योः, अपरत्र च नायकनायिकयोः संवादः उपस्थापितः कविना ।
कवीनां स्वतन्त्रतया पञ्चश्लोकात्मकं सुन्दरं रमणीयमेकं स्तोत्रं "श्रीरङ्गसंवादः" इति शीर्षकोपेतं लघुशरीरकमुक्तिप्रत्युक्तिरूपं समुल्लसति । तमत्रानुभवामः –
कदाचित् श्रीरङ्गं गताः कवीश्वराः तान् श्रीरङ्गनाथो भगवान् पृच्छति, कस्त्वम् ? इति । कवयः उत्तरं दधते । एवं संवादस्समारभ्यते इति कवीश्वराणां कल्पना ।

**यथा** –

कस्त्वं ? - *रङ्गनाथः*
रङ्गपते ! तव श्वशुर इत्यास्ते प्रसिद्धस्तु यः
तस्यापि श्वशुरोऽहमस्मि भगवन् ! - *कवयः*
एतन्नहि ज्ञायते । - *रङ्गनाथः*
वात्सल्यं त्वयि या वहन्त्यनुदिनं त्वत्सन्निधौ वर्तते
सेयं मे तनया कवेः ; - *कवयः*
इति कथं ? - *श्रीरङ्गनाथः*
येयं कवेरात्मजा ॥ - *कवयः*

कवेरस्य मुनेस्तपसा प्रवहन्ती नदी इति कवेस्यापत्यं स्त्रीः कावेरी इति पौराणिकाः । ततश्च कावेरी कवेरात्मजा । सभङ्गश्लेषतः कवेरात्मजा कवेः आत्मजा = कवेरात्मजा इत्यपि भवति । तदादाय कवय एवं वदन्ति ।

ज्ञातं ; किं भवतो विधेयमधुना ? - *श्रीरङ्गनाथः*
त्वन्नायिकेयं रमा
मा मां लक्ष्यमहो करोति - *कवयः*
किमिदं मातामहेऽप्यागते ? । - *श्रीरङ्गनाथः*
या चन्द्रे निजसोदरेऽपि विदया दृष्टे सपद्यात्मनः
गेहं मीलयतीति लोकविदितं का तत्र बन्धोः कथा ? - *कवयः*

लक्ष्मीकटाक्षो मम नास्तीति इदमेवं वर्णयन्ति कवयोऽत्र । चन्द्रोदये कमलानि लक्ष्म्याः पद्मालयायाः आलयभूतानि निमीलितानि भवन्तीतीदमवलम्ब्य क्षीराब्धौ लक्ष्म्या जातत्वात्सोदरागमने गेहमेलनं लक्ष्मीः करोतीति तत्र बन्धकथाप्रसङ्गो नास्तीति मातामहभूते स्वस्मिन् तस्याः पराङ्मुखत्वं तत्स्वभाव इति कवीनामाशयः ।

**उपसंहारः**

एवं प्रकारेण श्रीनिधिस्वामिसाहित्ये श्लोकैकगताः उक्तिप्रत्युक्तयः अतीव वैदुष्यपूर्णाः भवन्ति । साहित्यं तु सर्वदा मनोमोहकं भवति, चित्तं रञ्जयति, भावान् उद्दीपयति, क्लेशान् अपसारयति, कीर्तिं कलयति, वैदुष्यं विस्तारयति, परवर्तिकवीनां कृते नवीनसर्जनार्थं प्रेरणां प्रयच्छति, कान्तावदुपदेशं सन्तनोति च । श्रीनिधिस्वामिनः स्वीयरचनाचातुर्येण उक्तिप्रत्युक्तिमाध्यमेन भगवद्भक्तेः यादृशीं प्रतिभां प्रदर्शितवन्तः तत्सर्वेषामवश्यं मनोरञ्जकं भवति ।

**सन्दर्भ**


1. श्रीनिधिग्रन्थमाला, सम्पादकौ – श्री एस्.सुन्दरराजन्, श्री वि.एस्.करुणाकरन् ; राष्ट्रियसंस्कृतविद्यापीठम् (मानितविश्व- विद्यालयः), तिरुपतिः, 517507 । 2015 ।
2. साहित्यदर्पणः (विश्वनाथकृतः), सम्पादकः – शेषराजशर्मारेग्मी, कृष्णदास अकादमी, गोपालमन्दिरलैन, वाराणसी । 1998 ।
3. नाट्यशास्त्रम् (भरतमुनिप्रणीतम्), सम्पादकः – रविशङ्करनागरः, परिमलपब्लिकेशन्स, दिल्ली । 1988 ।
4. दीधितिटीकोपेतः ध्वन्यालोकः (आनन्दवर्धनप्रणीतः), संस्कृतव्याख्याकारः – श्रीबदरीनाथशर्मा, हिन्दीव्याख्याता – श्रीशोभितमिश्रः, चौखम्बा संस्कृत सीरीज अफिस्, वाराणसी – 1 । 1995 ।
5. काव्यविच्छित्तिमीमांसा, श्रीयुक्त जयमन्तमिश्रः, राष्ट्रियसंस्कृसंस्थानम्, नवदेहली । 1998 ।
6. काव्येष्वलङ्कारसन्निवेशनविधिः, डा.सोमनाथदाशः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः । 2007 ।